# श्री सोमनाथसंस्कृत-युनिवर्सिटी, वेरावलम्
# सत्रान्तपरीक्षा, अक्तुबर - 2019

| | | |
|---|---|---|
| **कक्षा –** शास्त्री-**3** | **सत्रम् – 5** | **गुणाः - 70** |
| **विषयः –** पुराणेतिहासः | **प्रश्नपत्रम् - 7 -** CE - 3.5.9 | **समयः - 3 तः 6** |
| **दिनाङ्कः- 16/10/2019** | **सन्दर्भग्रन्थः –** भागवते 2-8 स्कन्धौ | |

**( प्रथमान्वितिः - युनिट-1 )**

**प्र-1 द्वयोः ससन्दर्भं व्याख्या कार्या।** **10**

1. तस्माद्भारत सर्वात्मा भगवानीश्वरो हरिः।
   श्रोतव्यः कीर्तितव्यश्च स्मर्तव्यश्चेच्छताभयम्॥
2. चीराणि किं पथि न सन्ति दिशन्ति भिक्षां नैवाङ्घ्रिपाः परभृतः सरितोऽप्यशुष्यन्।
   रुद्धा गुहा किमजितोऽवति नोपसन्नान् कस्माद् भजन्ति कवयो धनदुर्मदान्धान्॥
3. बिले बतोरुक्रमविक्रमान् ये न शृण्वतः कर्णपुटे नरस्य।
   जिह्वाऽसती दार्दुरिकेव सूत न चोपगायत्युरुगायगाथाः॥

**प्र-2 कस्यचिदेकस्य वर्णनं क्रियताम्।** **10**

1. भगववल्लीलावतारकथा।
2. भगवतो विराट्स्वरूपम्।

**प्र-3 द्वयोः ससन्दर्भं व्याख्या कार्या।** **10**

1. सोऽन्तः सरस्युरुबलेन गृहीत आर्तो दृष्ट्वा गरुत्मति हरिं स्व उपात्तचक्रम्।
   उत्क्षिप्य साम्बुजकरं गिरमाह कृच्छ्रान्नारायणाखिलगुरो भगवन् नमस्ते॥
2. येन चेतयते विश्वं विश्वं चेतयते न यम्। यो जागर्ति शयानेऽस्मिन्नायं ते वेद वेद सः॥
3. विलोक्य विघ्नेशविधिं तदेश्वरो दुरन्तवीर्योऽवितथाभिसन्धिः।
   कृत्वा वपुः काच्छपमद्भुतं महत् प्रविश्य तोयं गिरिमुज्जहार॥

**प्र-4 द्वयोरेकस्य सारः लेख्यः।** **10**

1. गजेन्द्रेण कृता भगवत्स्तुतिः।
2. सुरासुरैः कृतं समुद्रमन्थनम्।

**( द्वितीयान्वितिः - युनिट-2 )**

**प्र-5 द्वयोः ससन्दर्भपूर्वकं व्याख्या विधेया।** **10**

1. गृहेषु येष्वतिथयो नार्चिताः सलिलैरपि।
   यदि निर्यान्ति ते नूनं फेरुराजगृहोपमाः॥
2. क्व देहो भौतिकोऽनात्मा क्व चात्माप्रकृतेः परः।

कस्य के पतिपुत्राद्या मोह एव हि कारणम् ।।

3. गोविप्रसुरसाधूनां छन्दसामपि चेश्वरः ।
रक्षामिच्छंस्तनूर्धत्ते धर्मस्यार्थस्य चैव हि ।।

**प्र-6 कस्याप्येकस्य निरूपणं कुरुत । 10**

1. कश्यपेन प्रोक्तः पयोव्रतोपदेशः ।
2. भगवतो वामनस्य प्राकट्यम् ।

**प्र-7 दशानां एकवाक्येन उत्तराणि लिखत । 10**

1. अष्टमस्कन्धे द्वितीये च स्कन्धे कति अध्यायाः
2. यज्ञपुरुषः कस्य गर्भादवतरत
3. क्षीरसागरे कः पर्वत अवर्तत
4. परमं जाप्यं कः जजाप
5. ग्राहः प्राक्जन्मनि को नाम गन्धर्वासीत्
6. ग्राहः कस्य शापादिमां गतिमवाप
7. नागानां राजा कः आसीत्
8. नागस्य किमङ्गममङ्गलम्
9. विघ्ननिवारणाय भगवान् किं रूपं दधौ
10. कालकूटम् - अर्थात् किम्
11. हविर्धानी - इत्यस्य कोऽर्थ
12. उच्चैः श्रवा नामहयं प्राप्तुं कः स्पृहां चक्रे
13. बलिः कस्य पुत्रासीत्
14. संज्ञा-छाये कस्य कन्ये आस्ताम्
15. शुक्राचार्यः कस्य पुत्रासीत्

************